अनुक्रमांक [ | | | | ]

# B

APS-(904) Sanskrit

# अर्द्ध वार्षिक परीक्षा सत्र 2018-19

## कक्षा — 9

## विषय — संस्कृत

समय : 3.15 घण्टे पूर्णांक : 70

नोट : 1. सर्वे प्रश्नाः अनिवार्याः।

2. प्रत्येक प्रश्नस्योत्तर उत्तर पुस्तिकायामेव देयम्।

1. अधोलिखित गद्यांश पठित्वा एतदाधारित प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत। 7

गौरेकः परमः सात्विकः प्राणी। मानवजीवनस्य नास्ति कोऽपि भागः यत्र गोभिरूपकारो न विधीयते। यथा माता पुत्रं पालयति पोषयति तथैव गौरपि पालयति पोषयति स्वदुग्धादिना मनुजान्। तृणानि चरित्वाऽमृतमयं दुग्धं ददाति मानवेभ्यः। अस्या वत्साः बलीवर्दाः भूत्वा हलेषु शकटीषु शकटेषु च युज्यन्ते विविधकृषिकर्मसु चोपयुज्यन्ते। कृषि प्रधानस्य भारतवर्षस्य तु सर्वस्वं गाव एव। वैज्ञानिकैः परीक्ष्येदं निर्णीतं यद् गोदुग्धे तानि सर्वाण्यपि तत्त्वानि सन्ति यानि मानवजीवनाय परमोपयोगीनि यानि च मानवस्य भोजने अपेक्ष्यन्ते। आयुर्वेदशास्त्रे तु गोदुग्धस्य सर्वदुग्धेभ्यः उत्तमता औषधिस्वरूपता च सर्वथा प्रतिपादिता। गव्यं दधि नवनीतं घृतं चापि प्रशस्यतरं मन्यते। गव्यं घृतं बलं ददाति, अग्निमान्द्यं हरति, त्रिदोषं नाशयति, मेधां लावण्यं कान्तिं तेज ओजश्च वर्धयति, आयुष्करं परमरसायनं चास्ति। गवां पयो-दधिघृतमूत्रगोमयमयं पञ्चगव्यं विविध शारीरिकरोगाणां परमं शोधकं निवारक च औषधमस्ति।

(क) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।
(ख) गौः कीदृशः प्राणी वर्तते ?
(ग) गोवत्साः केषु कार्येषु प्रयुज्यन्ते ?
(घ) गोदुग्धस्य किं वैशिष्ट्यमस्ति ?
(ङ) गव्यघृतस्य के लाभाः सन्ति ?
(च) विविधशारीरिकरोगाणां शोधकं निवारकं औषधं किमस्ति ?
(छ) उपर्युक्त गद्यांशस्य संक्षिप्तीकरणं कुरुत।

2. (अ) अधोलिखितं गद्यांश पठित्वा कश्चित एकस्य गद्यांशस्य हिन्दीभाषायां अनुवादं कुरुत— 3

रामकृष्ण परमहंसः अपि श्रेष्ठ शिष्ययस्य प्रतिक्षाँकुर्वन्नेव आसीत्। सः नरेन्द्रस्य समीपं गत्वा रुदन् तमवलोकयतिस्म। गुरोः नेत्रयोः अश्रुधारां दृष्ट्वा नरेन्द्रः विस्मितोऽभवत्। परमहंसः तम् अकथयत्- केन कारणेन विलम्बेन आगतः। अहं तव प्रतीक्षाम् कुर्वन आसम्। नरेन्द्रः अपृच्छत्- किं भवान ईश्वरं दृष्टवान् ? गुरुः प्रत्युत्तरत- आम्। अहं ईशदर्शनं कृतवान्।

P.T.O.

वा

(ख) जनयो: जनानां वा मध्ये विचाराणां भावनानां सूचनानां वा विनिमय: संचार: कथ्यते। विचाराणां भावनानां सूचनानां वा परस्परमादान प्रदानाय यत् साधनं प्रयुज्यते तत् सञ्चारसाधनं भवति। मानवसभ्यताया: प्रारम्भकाले यदा भाषा विकसिता तदानीं भाव प्रेषणाय संकेतानां ध्वनि चिह्नानां वा प्रयोगो भवति स्म। शनै: शनै: भाषा विकसिता जाता। जना: भाषामाध्यमेन परस्परं सञ्चारकं भाव प्रेषणं वा कुर्वन्ति स्म।

3. अधोलिखितस्य कस्यचित एकस्य श्लोकस्य हिन्दीभाषायां अनुवादं कुरुत—5

(क) यदा यदा हि धर्मस्य ग्लानिर्भवति भारत!
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।।

वा

(ख) अयं निज: परो वेति गणना लघुचेतसाम्।
उदारचरितान्तु वसुधैव कुटुम्बकम्।।

4. अधोलिखितस्य कस्यचित एकस्य श्लोकस्य संस्कृतभाषायां सरल व्याख्या कुरुत—5

(क) काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा।।

वा

(ख) रूप-यौवन-सम्पन्ना: विशाल-कुल-सम्भवा:।
विद्या-हीना: न शोभन्ते निर्गन्धा इव किंशुका:।।

5. अधोलिखितानाम् वाक्येषु पञ्चवाक्यानाम् संस्कृते अनुवादं कुरुत— 5

(1) वह पुस्तक पढ़ती है। (2) गीता खेल खेलेगी।
(3) हम सब जयपुर गए। (4) विद्यालय के चारों ओर पेड़ है।
(5) गुनगुन घर जाओ। (6) हमें जल्दी उठना चाहिए।
(7) ये सब पुस्तकें। (8) वे दोनों नाचेंगी।

6. रेखांकित पदमाधृत्य प्रश्न-निर्माणं कुरुत— 3

(क) कार्याणि <u>उद्यमेन</u> सिध्यन्ति। (ख) विद्वान <u>सर्वत्र</u> पूज्यते।
(ग) मनुष्यरूपेण मृगाश्चरन्ति।

7. (अ) स्वविद्यालयस्य वार्षिकोत्सवे निमन्त्रयन् स्वमित्रम् एकं पत्रं लिखत। 4

वा

(ब) आत्मानं नवम्या: कक्षाया: अर्जुन: इति मत्वा स्व प्रधानाचार्यायै दिनत्रयस्य अवकाशार्थं प्रार्थनापत्रं लिखत।

8. स्वपाठ्यपुस्तकात् दौ श्लोकौ लिखत यौ अस्मिन् प्रश्न पत्रे न स्याताम्। 4

9. अधोलिखितानाम् प्रश्नेषु केषांचित पञ्चप्रश्नानाम् उत्तराणि लिखत— 5

(1) योगस्य अष्टम: अंग: क: ?
(2) महाकविदण्डिन: रचना का वर्तते ?
(3) हितोपदेशस्य कति परिच्छेदा: ?
(4) योग: किम् उच्यते ?

(5) केषां सेना भयाद्भीता ?

(6) नागार्जुनः कां विधि दत्तवान् ?

(7) मूषकशत्रोः नकुलस्य नाम किमासीत् ?

(8) मूषकस्य गृहं कति द्वारात्मकमासीत् ?

10. अधोलिखितानाम् पदेषु संधि विच्छेदं वा कृत्वा सन्धेः नामापि लिखत— 2

(1) हिमालयः (2) रमेशः

(3) लघूर्मिः (4) स्वागतः

11. अधोलिखितं वाक्येषु रेखांकित पदेषु विभक्ति तस्या कारणं च लिखत— 2

(1) ग्रामं परित उद्यानम् अस्ति।

(2) ॐ नमः शिवाय:।

(3) सः नेत्रेण काणः अस्ति।

(4) बालकः सिंहात् बिभेति।

12. अधोलिखित पदानां समासविग्रहं कृत्वा समासस्य नाम निर्देशनं कुरुत— 2

(1) यथाशक्ति (2) राज्ञ पुरुषः

(3) ग्राम गतः (4) सप्त ग्रामम्

13. कोष्ठकेषुः प्रदत्तैः शब्दै प्रकृति प्रत्ययानुसारं पूर्ति कुरुत— 2

(1) नीलम .................. (पठ् + तुमुन्) विद्यालयं गच्छति।

(2) नरेशः कार्यं ............... (कृ + क्त्वा) बहि गच्छति।

14. अधोलिखित पदेषु उपसर्ग निर्देशनं कुरुत— 2

(1) उपकरोति (2) संभूय

(3) आवहति (4) प्रयुज्यते

15. अधोलिखितानाम् शब्दानां निर्देशानुसार लिखत— 2

(1) राम शब्द पंचमी विभक्ति एकवचनम्।

(2) भानु शब्द द्वितीया विभति बहुवचनम्।

(3) रमा शब्द द्वितीया विभक्ति द्विवचनम्।

(4) इदम् शब्द प्रथमा विभक्ति बहुवचनम्।

16. अधोलिखितेषु धातु-लकार-पुरुष-वचनानां निर्देशं कुरुत— 5

| | पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| (1) | जानाति | ............. | ............. | ............. | ............. |
| (2) | अपठन् | ............. | ............. | ............. | ............. |
| (3) | करिष्यामि | ............. | ............. | ............. | ............. |
| (4) | गच्छति | ............. | ............. | ............. | ............. |

17. रिक्त स्थानानि मंजूषायां द्त्तै शब्दैः पूरयन् लघुकथा लेखनीया। 5

विचार्य, वेदनया, किंचित, जलचराः, अभवत्, अतीव, शुष्कं, वध्यशिलां, प्रस्थितवान, महता

कश्चन तमालवृक्षः आसीत्। तस्य शाखायां ............ आसीत्। तत्र कश्चनः चटकः पत्न्या सह वसति स्म। कदाचित ............ आगतः। बहि सर्वत्र ............ आसीत् नीडे तु औष्ण्यम आसीत्। तदा कश्चनः वानरः तत्र आगतवान्। शैत्येन सः कम्पते स्म। सः वानरः दन्तवीणां ............ वृक्षम् आरूह्यम् उपविष्टवान् तं दृष्ट्वा चटका उक्तवती–भवतः सुदृढं शरीरम्। किमर्थं भवान् गृहं ............ वासं न करोति ? व्यर्थमेव शीतपीडाम् अनुभवति। वानरः प्रत्युत्तरत्– 'रे अधर्मे ! किमर्थं ............ न तिष्ठति।' मम विषये भवती किमर्थं चितयति ? तथापि चटका पुनः ............ आरब्धवती। तेन वानरस्य ............ आगतः। सः वानरः वां शाखाम् ............ चटकायाः नीडं शतधा ............ कृतवान्। एवं व्यर्थः मूर्खोपदेशः।

18. अधोलिखित् वाक्यान् कथा क्रमानुसार लिखत— 3

(1) तस्य वृक्षस्य समीपे एका लोमशाअपि निवसति स्म।

(2) एकस्मिन् वृक्षे एकः काकः निवसति स्म।

(3) आत्मनः प्रशंसां श्रुत्वा प्रसन्नः अभवत्।

(4) एकदा सः काकः एकां रोटिकाम् आनयत्।

(5) लोमशा तं दृष्ट्वा केनापि उपायेन रोटिकां गृहीतुम् ऐच्छत्।

(6) यावत् गायति तावत् विवृतात् मुखात् रोटिका भूमौ अपतत्।

19. अधोलिखित वर्णैः सह तेषाम् उच्चारण स्थानानि मेलनं कुरुत— 2

(1) ह् ............... तालु (2) य् .......... कण्ठः।

(3) ष ............... कण्ठोष्ठम्। (4) ठ ........... मूर्धा।

20. चित्रं दृष्ट्रा पर्यावरणप्रदूषणस्य वर्णनं कुरुत। 5

पर्यावरणम्, संरक्षणम्, नानाविधैः, प्रदूषणम्, औद्योगिकविकासेन अपि, धूमेन, जीवनम् कठिनम्, अस्माकं दायित्वम्।

